# १०. आत्मनेपदीया ।

(तृतीयः घटकः)

अपूर्वः कोऽपि कोषोऽयं **विद्यते** तव भारति ।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ।।१।।

कुसुमं वर्णसम्पन्नं गन्धहीनं न **शोभते** ।
न **शोभते** क्रियाहीनं मधुरं वचनं तथा ।।२।।

अपारे काव्यसंसारे कविरेकः प्रजापतिः ।
यथास्मै **रोचते** विश्वं तथा वै **परिवर्तते** ।।३।।

शतेषु **जायते** शूरः सहस्रेषु च पण्डितः ।
वक्ता दशसहस्रेषु दाता भवति वा न वा ।।४।।

न देवो **वर्तते** काष्ठे न पाषाणे न मृण्मये ।
भावे हि **विद्यते** देवः तस्माद् भावो हि कारणम् ।।५।।

## भाषाभ्यासः

### श्लोकः-१

१. श्लोके क्रियापदं किम्?

२. अधोदत्तानां शब्दानां कृते श्लोके आगतान् शब्दान् लिखत ।

सरस्वती- अद्वितीयः-

सङ्ग्रहः -

३. विरुद्धार्थकशब्दं लिखत ।

व्ययः × वृद्धिः ×

### श्लोकः-२

१. श्लोके क्रियापदं किम्?

२. विशेषण-विशेष्य-सम्बन्धः -

१) 'कुसुमम्' इत्यस्य द्वे विशेषणे लिखत ।

२) 'वचनम्' इत्यस्य द्वे विशेषणे लिखत ।

३. श्लोकात् समानार्थकशब्दान् चिनुत ।

१) प्रसूनम्, सुमम्, पुष्पम् - ☐

२) वचः, उक्तिः, वाक्यम् - ☐

### श्लोकः-३

एकवाक्येन उत्तरत ।

१. श्लोके क्रियापदे के ?

२. अपारे काव्यसंसारे कः प्रजापतिः ?

**श्लोकः–४**

१. स्तम्भमेलनं कुरुत ।

| ‘अ’ | ‘ब’ |
|---|---|
| शतेषु | दाता |
| सहस्रेषु | शूरः |
| दशसहस्रेषु | पण्डितः |
| | वक्ता |

२. कस्मिन् कः गुणः वर्तते? इति लिखत ।

अ – शूरे, पण्डिते, भाषणनिपुणे, उदारे

ब – दातृत्वम्, वक्तृत्वम्, पाण्डित्यम्, शौर्यम्

३. समानार्थकशब्दान् लिखत ।

दाता, शूरः, पण्डितः

**श्लोकः–५**

१. देवः कुत्र वर्तते?

२. देवः, काष्ठम्, पाषाणः इति शब्दानाम् अमरकोषपङ्क्तीः लिखत ।

३. जालरेखाचित्रं पूरयत ।




- **सर्वेषां सुभाषितानां सरलार्थं स्पष्टीकरणं च माध्यमभाषया लिखत ।**

---

**पञ्चदश वाक्यानि । (आत्मनेपदम्)**

| | | |
|---|---|---|
| १. सः बालकः भाषते । | २ तौ बालकौ भाषेते । | ३ ते बालकाः भाषन्ते । |
| १ सा कन्या भाषते । | २ ते कन्ये भाषेते । | ३ ताः कन्याः भाषन्ते । |
| १ तद् अपत्यं भाषते । | २ ते अपत्ये भाषेते । | ३ तानि अपत्यानि भाषन्ते । |
| ४ त्वं भाषसे । | ५ युवां भाषेथे । | ६ यूयं भाषध्वे । |
| ७ अहं भाषे । | ८ आवां भाषावहे । | ९ वयं भाषामहे । |

---



**पठत–बोधत**





एषा छत्रपतिशिवरायस्य राजमुद्रा । मुद्रायां मुद्रित–श्लोकः ईदृशः–

“प्रतिपच्चन्द्रलेखेव वर्धिष्णुर्विश्ववन्दिता ।
शाहसूनोः शिवस्यैषा मुद्रा भद्राय **राजते** ।।”

अस्य श्लोकस्य अर्थः–

(शाहसूनोः) (शहाजिमहाराजस्य पुत्रस्य शिवस्य) छत्रपतिशिवरायस्य (प्रतिपच्चन्द्रलेखा इव वर्धिष्णुः) यथा प्रतिपदः चन्द्रलेखा प्रतिदिनं वर्धते तथा वर्धमाना, (विश्ववन्दिता) विश्वस्य कृते वन्दनीया (मुद्रा) राजमुद्रा (भद्राय) कल्याणाय (राजते) शोभते । इति ।

अद्य अपि एषा मुद्रा प्राचीनग्रन्थालयेषु पुस्तकेषु संग्रहालयेषु च द्रष्टुं शक्यते ।

अधोदत्तानि उदाहरणानि पठन्तु। कतिचन-उदाहरणेषु 'न'कारः विद्यते, कतिचन-उदाहरणेषु 'ण'कारः भवति। यथा

| | तृतीया एकवचनम् | षष्ठी बहुवचनम् |
|---|---|---|
| देव | देवेन | देवानाम् |
| नेत्र | **नेत्रेण** | **नेत्राणाम्** |
| हस्त | हस्तेन | हस्तानाम् |
| सूर्य | **सूर्येण** | **सूर्याणाम्** |

**नकारस्य णकारः कदा भवति ?**

| ऋ<br>र्<br>ष् | + | क वर्गः/<br>प वर्गः/<br>य्/व्/ह् /<br>कोऽपि स्वरः | + | **न = ण** |
|---|---|---|---|---|

र् + आ + म् + ए + न् + अ = रामे**ण**
र् + आ + म् + आ + न् + आ + म् = रामा**णा**म्
ऋ + क् + ष् + ए + न् + अ = ऋक्षे**ण**
ऋ + क् + ष् + आ + न् + आ + म् = ऋक्षा**णा**म्

| ऋ<br>र्<br>ष् | + | च वर्ग/<br>ट वर्ग/<br>त वर्ग/ल्, श्, स् | + | **न = न** |
|---|---|---|---|---|

र् + अ + ज् + अ + क् + ए + न् + अ = रजकेन
र् + अ + ज् + अ + क् + आ + न् + आ + म् = रजकानाम्
व् + ऋ + ष् + अ + ल् + ए + न् + अ = वृषलेन
व् + ऋ + ष् + अ + ल् + आ + न् + आ + म् = वृषलानाम्

**अधोदत्तानां शब्दानां तृतीया विभक्तेः एकवचनरूपाणि/षष्ठी विभक्तेः बहुवचनरूपाणि लिखत।**

| | | |
|---|---|---|
| वराह = | वस्त्र = | क्रीडा = |
| गृह = | प्रजा = | स्पर्श = |
| स्तोत्र = | कर्ण = | वृक्ष = |
| राक्षस = | अमर्त्य = | स्नुषा = |
| तारा = | राधा = | भाषा = |
| सूत्र = | तक्षक = | पुष्प = |

ICKQGH

**अस्ति (✓) वा नास्ति (×) इति लिखत।**

| मम समीपे | वर्गे | गृहे | ग्रन्थालये |
|---|---|---|---|
| लेखनी | चित्रफलकम् | दूरदर्शनम् | संस्कृतकथापुस्तकम् |
| लेखनपुस्तिका | दिनदर्शिका | सङ्गणकः | सम्भाषणसन्देशः (संस्कृतमासिकम्) |
| शब्दधातुरूपावलिः | उत्पीठिका | कपाटिका | संस्कृतशब्दकोषः |
| शब्दकोषः | आसन्दः | शीतकपाटिका | सुधर्मा (संस्कृतदैनिकम्) |
| पाठ्यपुस्तकम् | सुधाखण्डः | दर्पणः | अमरकोषः |
| द्विचक्रिका | फलकमार्जनी | दण्डदीपः | संस्कृतिकोषः |